CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 467

Title Tattvabodhinī

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 467 Subject: Grammar.

Title: Tattvabodhinī

Author: —— Scribe: Dīnamaṇiśaṅkara

Date of the work: —— Date of the Ms.: ——

Place of the work: —— Place of the Ms.: ——

Size: 10.8" by 4.6" Extent: 20 foll.

Language: Sanskrit Script: Devanāgarī

Remarks: Incomplete.

॥तत्वबोधिनीउत्तरार्द्धप्रारम्भः॥
गुरु दिनमणिशंकरजीनीपत्रसं।

॥१॥ श्रीगणेशाय नमः अज्ञानतापशान्तेदं दीक्षितं भक्तरक्षणे। वटमूलाश्रयं वन्दे दक्षिणामूर्तिमाश्रये।१। प्रथमश्लोके विघ्नविघा
तायकृतं मंगलं शिष्यशिक्षार्थं निबध्नाति श्रौत्रेत्यादिना। श्रोत्रियस्य भावः श्रौत्रं। हायनान्तयुवादिभ्योऽणिति सूत्रे श्रोत्रियस्य
यलोपश्चेति वार्त्तिकादणि परे यस्येति चेतीकारलोपः। अर्हतो भावः आर्हन्त्यं। गुणवचनब्राह्मणादिभ्य इति सूत्रे
र्हतो नुम्चेत्युक्ते नुमप्यस्ति। षित्वात् ङीषि हलस्तद्धितस्येति यलोपः। ताभ्यां वित्तैः श्रौत्रार्हन्तीवशैः। तेन वित्त इति चणप्। श्रोत्रिय
त्वयोग्यताभ्यां प्रसिद्धैरित्यर्थः। किंच गुणैर्वै गुणावद्भिः प्रशस्तगुणयुक्तैरिति यावत्। रूपादाहतप्रशंसयोरिति सूत्रे त्वन्ये
पि हस्यतदस्मिन्गुणपदा ब्राह्मणादिष्वस्य भाष्यादावुदाहृतत्वात्। अहर्दिवमिति। अहन्यहनि। प्रत्यहमित्यर्थः। अचतुरे
त्यादिना निपातनात्साधुः। तोष्टूयमान इति। स्तौतेर्यङन्तात्कर्मणि शानच्। सार्वधातुके यगिति धातोर्यक्। अनेमुगिति मुक्
अपिशब्देन विरोधं द्योतयति। वस्तुतस्तु न विरोधः। स्तुतिप्रयोजकीभूतानामनन्तकल्याणगुणानां प्रतिस्फूर्तिसिद्धत्वे शिवः
पि वियदादिवद्व्यावहारिकत्वात्तदभावस्य पारमार्थिकत्वाद्वेदान्तोत्तरमीमांसायास्य एमेव। विभुर्व्यापकः परमेश्वरः। अतिश कृष्णः
येन विजयते विजयतेतराम्। सर्वोत्कर्षेण वर्त्तत इति फलितोऽर्थः। विपराभ्यां जेरिति तङ्। तदन्तात् द्विवचनविभज्येत्यादिना तरपि राम
किमेत्तिङव्ययघ[illegible]याम्। न निज्जन्नपूरलेभ एव। विजयतेतरामस्य अप्रातिपदिक[illegible]तिङन्तत्वात्। ननु सह सुपेत्यसमासे इति १

॥१॥

याग। विभाषातिङ् तेन विशिष्टस्य समासे प्रातिपदिकं स्यादेवेति वाच्यं। स च छंदस्येवेति तत्तत्प्रयोगेन सह विरोधापत्तेः। किंच प्रातिपदिक
त्वाभ्युपगमे सोरत्ववृत्तिः स्यात्। लिंगसर्वनामताभ्युपगमेन नपुंसकत्वात्स्वोर्लुक्यपि ह्रस्वो नपुंसक इति ह्रस्वो दुर्वारः स्यात्। समुदायान्तर्गत
स्य जयतइत्यस्य तिङन्तत्वेपि साकांक्षत्वेन असामर्थ्यात्तत्तोपि प्रवित्तुं नार्हतीति समर्थः पदविधिरिति परिभाषितत्वात् आमन्तेन विग्रहो
पुत्पत्त इति कल्पनायां तु अन्तरंगत्वात्तरसैव पदप्रवृत्तौ विजयजित्तरामिति स्यादिति चेदत्राहुः। समुदायान्तर्गतात् जयतइत्यस्मादेव तर
प्रानवतस्य विग्रहेन सह साकांक्षत्वेनासामर्थ्येपि शब्दं। तिङं तस्य प्रधानत्वेन तस्यापेक्षत्वेपि दोषाभावात्। द्युस्ययोस्य द्योतकत्वेन प्रत्येका
र्थत्वमिनाम्। तिसकांक्षता यावत्तुमशक्यत्वादिति। हन्तेत्यनहर्वेकं वर्णिष्यमाणमाह पूर्वोह्ण इति। हलन्ते पुंस्प्रेगनुदर्केत्यादिना
ह्निन्नादिष्वनुत्पादनं प्रासंगिकमिति भावः। तुर्यस्तुरीयं। चतुरश्छयतावाद्यक्षरलोपश्चेत्युक्तत्वात्। अर्थात्। इहापि हि सुगावह्नि या
मत्व। अणानुपारंस्याद्युत्पादनं प्रासंगिकं बोध्यं। प्राधान्येन तु तन्निर्याख्या पश्चादेव होष्यत इति भावः। अनुबंधभेदेन भेदमा
श्रित्याह दशलकारा इति। पदर्शयन्त इति। यद्यपि पंचमलकारे रूपाणि अधुना न ख्यात्या घंतेतथापि लकाराणां स्वरूपेण प्रदर्श
तेल्लः कर्मणि च भावे चाकर्मकेभ्यः। लस्य स्थानादिस्त्वविषयतां व्युत्पादयितुमिति भावः। पंचम इति। लिडित्यर्थः। लट् लिङ् लिडिति वेत्त
कमाध्येद्वयं लिटः पंचमत्वं तु लत्तोन्नकमेणेति बोध्यं। वर्त्तमाने लट्। वर्त्तमान इत्येतत्प्रकृत्यर्थविशेषणमित्याह। वर्त्तमानक्रि
याहत्तेर्धातोरिति। धातोरित्यधिकारात्। तोह्याख्यायां तमपि। क्रियत इति भावः। लटूस्यादिति। तस्य वाच्यं त्वनुपदमेव स्फुटीभविष्य

तिः। वर्त्तमानकालस्तु न तद्वाच्यः किंतु द्योत्य एव लडादिष्वपि भूतादिकालो यथायथं द्योत्य एवेत्यवगंतव्यं। वस्तुतस्तु वाच्यत्वाभ्युपगमेपि
सुगम इति दिग्विभ्यादिसूत्रेव स्याम॥ आदावितावित्वि। आकार उच्चारणार्थ इति तु नोक्तं लिडादिदेवलकुराय संख्यादनायतस्यावश्यं वक्तव्यता
तेत। लःकर्मणि च। चकारात्कर्त्तरि इत्यादिसत्तः कर्त्तरीत्यनुवर्त्यते। सकर्मकविषयं चेदं अकर्मकेभ्यः कर्मणि तस्य बाधितत्वात् भावे चे
त्युक्तत्वात् तत्र विशेषविधानाच्च। तदेतदाह सकर्मकेभ्य इति भावे चेति चकारेण कर्त्तैवानुकृष्यते न तु कर्म असंभवात् तदाह भा
वे कर्त्तरि चेति। ननु भावकर्मणोरात्मनेपदविधानाल्लेपात्कर्त्तरीति परस्मैपदविधानाच्च ज्ञापकाल्लकाराणां भावकर्मकर्त्तारोर्था अनु
मातुं शक्यं तत इति किमनेन सूत्रेण। मैवं असस्मिन्सूत्रे सकर्मकेभ्योपि घञादिवद्भावे लकारापत्तेः घटं क्रियते देवदत्तेनेत्यादिप्रयोगः प्र
सज्येत तन्मा भूदित्येतदर्थमेतत्सूत्रस्यावश्यकत्वात्। नचैवमकर्मकेभ्यो भावेस्येव सत्र्यतां भावे चाकर्मकेभ्य एवेति नियमार्थमिति वाच्यं।
अकर्मकेभ्यो भाव एवेति विपरीतनियमापत्त्या कर्त्तरि तेभ्यो लकारानापत्तेः। तस्माद्भावे चेति चकारस्यावश्यकः। न चैवं भावे चाक
र्मकेभ्य इत्येवास्त्विति वाच्यं भावे कर्त्तरि चाकर्मकेभ्य एवेति नियमापत्त्या सकर्मकेभ्यो भाव इव कर्त्तर्यपि लकारानापत्तेः। नन्वेवमपि शिवः
लःकर्मणि च भावे चाकर्मकेभ्य इत्येवास्तु चकारेण कर्त्तरीत्यनुकर्षणात् लकाराः सकर्मकेभ्यः कर्त्तरि स्युरकर्मकेभ्यो भावे कर्त्तरि च स्युरि
त्यर्थपर्यवसिते कर्मणि लक्ष्यज्ञापकाद्विधास्यतीति किमनेन कर्मणीत्यनेनेति चेन्मैवं। उत्तरसूत्रे तयोरित्यनेन कर्मणोपि पराम राम
र्शार्थं तस्यावश्यकतया ज्ञापकानुसरणे क्लेशस्य वैयर्थ्यात्। तस्माद्यथान्यासमेव रमणीयम्। अत्र नैयायिकाः लकाराणां कृतावे २

व शक्तिः लाघवान्न तु कर्त्तरि कृतिमत्ता कर्तृत्वेन तत्र शक्तौ गौरवात्। देवदत्त इत्यादिप्रथमांतपदेन तद्भानाच्च। देवदत्तः पचतीत्यत्र हि देव
दत्तो विशेष्यः यत्नो विशेषणं। आश्रयत्वं तु संसर्गस्तथा च पाकानुकूलकृत्याश्रयो देवदत्त इत्यादिशाब्दबोधोपि समुपपद्यत इति। त
न। पचतीत्युक्ते याककर्त्ताकः इत्याकांक्षानुरोधेन लकाराणां कर्त्तरि शक्तिरित्यभ्युपगंतुमुचितत्वात्। पाकानुकूलकृतिरिति शाब्दबो
धाभ्युपगमे तु कस्मिन्नित्याकांक्षा स्यान्न स्यादिति वा न चैकत्वकर्तृका पचिक्रियेति शाब्दबोधाभ्युपगमेपि क इत्याकांक्षा नोपपद्यत एवेति प्राच्यं
।कर्तृसामान्यबोधे सति क इति कर्तृविशेषाकांक्षायां बाधकाभावात्। नापि देवदत्तकर्तृका पचिक्रियेत्युक्तेपि कस्मिन्न्। किंकस्य वेत्या
कांक्षानुदयाद्वैवेति शब्दविवित्ति अनुकूलव्यापारस्यैव पचिक्रियात्वात् तदाश्रयस्य देवदत्तस्य कर्तृत्वात् क्रियाश्रयत्वे निश्चिते कस्मिन्नि
त्याद्याकांक्षाया अप्रसक्तेः। किंच पचंतं देवदत्तं पश्य पचते देवदत्ताय देहि पचमानस्य देवदत्तस्य रूपमित्यादौ शतृशानजादीनाम
पि तिवादिवल्लादेशत्वाविशेषेण तेभ्योपि कृतिमात्रबोधापत्तेः। नचेष्टापत्तिः आश्रयत्वं संसर्ग इत्युक्तत्वेन पाकानुकूलकृत्याश्रय
देवदत्तं पश्येत्याद्यर्थसाकारे दोषाभावादिति वाच्यं। नामार्थयोर्भेदान्वयस्य व्युत्पत्तिसिद्धांतविरुद्धत्वात्। नचैवं नामार्थयोरभेद
संसर्गव्युत्पत्त्यनुरोधेन शतृशानजादीनां कर्त्तरि शक्तिस्तिवादीनां कृतावेवेति वैषम्यं स्वीक्रियते प्रामाणिकगौरवस्यादोषत्वा
दिति वाच्यम्। स्थानिवद्भावेनैकोलाघवात्तत्वादेशे गौरवादिति सिद्धांतस्य परित्यागापत्तेः। शपः शानं कर्त्तरादित्यादौ विसर्गो
रमिसोरहरिचकृते लाघवात्तु तेने वशक्तिर्न तु तत्तद्रूपेणेत्यादि। भवदीयव्यवहारस्यासंगत्यापत्तेश्च। एवं च तिवादीनां शत्रादीनां

ग·ति·

॥२॥ न॰ ३

स्मारकतत्पालिपिस्थानीयत्वं बोधकत्वं तुल्यं वा स्यादेवेति स्थिते सत्यवशात्वाच्यंते कर्तरि शानच्‌ इत्यभ्युपगमे तिङ्‌ते कथं शक्तिबोधयेत्‌। अन्या
यस्यानेकार्थत्वमिति न्यायात्‌। कश्चित्तु वैयाकरणरीतिमाश्रित्य सर्वत्रादेशा एव वाचका इत्यभ्युपगम्य तेतरहि घटं घटेन इत्येव विमोति
त्यादिषु सर्वेषु सर्वपदादेशा इति न्यायेन पदस्फोटो वाक्यस्फोटस्य सिध्येदिति भवतां तन्महदनिष्टं। किंच कर्त्तरि कृदंतिय स्तर्त्यश्च इति
देवलः कर्मणीति स्त्रेचकारेणानुकृष्यत इति कथं खलादीनां ल्युटाणां च वशात्त्वे लक्ष्णायां न च नामार्थयोरभेदान्वयसंसर्गोऽभ्युप
गम एवात्खलादौ कर्तुर्वाख्यतेवाज्ञमितिवाक्यं पचति इति रूपपचतिकलं देवदत्त इत्यादानुरोधेन तिङ्‌स्त्वपि कर्त्तुर्वाच्यतोचितात्‌। ननु
समुदायस्यैनामत्वेऽपि तिङ्‌प्रत्ययोन्नना मेतिचेत्साक्षकरस्य त्रार्थक इसे तन्नना मेतितुल्यं। अकंतं नामेतिचेत्तद्रूपबाधं तमपि नामेतितुल्यं।
अतस्त्वावप्रशस्तया कर्त्ता देवदत्त इत्याद्यभेदान्वयो भवद्भिरभ्युपगंतव्य इतितिङ्‌स्त्वपि कर्त्तुर्वाच्यतास्त्री कर्त्तर्येव। किंच कर्त्तुर्वाच्यता
नभ्युपगमे पुष्पादिसमानाधिकरणो मध्यम अस्मद्युत्तम इति सामानाधिकरण्यप्रयुक्तपुरुषव्यवस्थाअभिहिते कर्त्तरि प्रथ
मेत्यादिकं च भवन्मते कथं संगच्छतां। न तु अनभिहित इत्यस्यानभिहितसंख्याक इत्यर्थं वर्णनेन देवदत्तः पचत्योदनमोदनः प
च्यते देवदत्तेनेत्यादौ प्रथमा द्वितीयादिव्यवस्थोपपन्नमुक्तं। तत्र। हु न्नं द्वितसमासे बहुसंख्याभिधानस्य प्रसिद्धत्वात्‌। तन्नस्य प्रत्य
बलं तुल्यः प्रामः प्रतिकोस्त्व प्राप्तोदको ग्राम इत्यादिषु कर्मणि द्वितीया स्यप्रवृत्तौ प्रथमानस्यात्‌। न च तिप्रसंगता संख्याहारेण संख्या राम
भिधानमभिहिता प्यस्तीति वाच्यं। स्थित इत्याद्यध्याहारेत्तदभावात्‌। प्राप्तेहितोयं देवदत्तो न तु नैया पिक इत्यादिषु नीलमिदं न तुरत्नमिस ३

नैव क्रिया यदाध्याहारस्यानावश्यकत्वात्‌पाख्यातेन शब्दः दर्दुरं करोतीति रुक्वद्भयेनवाक्यं संख्याया अनुक्तत्वाद्देवदत्ते कर्त्तरि
तृतीयापत्तिप्रसंगात्‌। तस्मादनभिहिते कर्त्तरीत्यादिव्याख्यानमेवाभ्युपेतव्यं। अपि च। धातूपात्तव्यापारस्याश्रयः कर्त्ता तत्राश्रयमा
त्रं हि तात्लकारणां चार्थः। नृतु व्यापारोऽपि। तस्याधीनेनैव लभ्यत्वात्‌। अत एव कर्त्ता कारक इत्यादौ प्रकृतिप्रत्ययार्थयोर्नान्वयः।
व्यापाराश्रयस्यप्रत्ययार्थत्वे तु तस्य प्रकृत्यर्थेन व्यापारेणान्वयः क्लिष्टः स्यात्‌। यत्तु वदंति कृधातोः कृतिरर्थः कृत्प्रत्ययस्यापि कृतौ
वेव शक्तिर्न तु कर्त्तरि कर्त्तरि कृदित्यत्र हि कर्त्तरीति भावप्रधानो निर्देशः कर्तृत्वं कृतिमत्त्वं। तच्च कृतिरेवान्यत्तु देवदत्तादिपदस
मभिव्याहारसत्वरूप्यादौ कृतिमति लक्षणास्यादि। तन्मते इष्टौ कर्मत्यादौ सुतरामनन्वयः। कर्मवत्कर्मणा तुल्यक्रिय इति स्त्रे कारोतिरुक्ता
दनार्थः उभयनिष्ठकर्मस्थ। यत्नार्थकत्वे तु कारिष्यते घट इत्यादि न सिध्येदिति वस्तुमाराहू पराचतुरुहुरं। आश्रयमात्रस्य प्रत्य
यार्थत्वे तु रथो गच्छतीत्यत्र रथस्याचेतनस्य यत्नाभावेऽपि गमनानुकूलचक्रभ्रमणादिव्यापाराश्रयत्वात्‌ न काचिदनुपपत्तिः
। एवं स्थिते कृतौ प्राक्तिरित्यस्योक्तिसंभव एव नास्ति। कृतेरपि व्यापारविशेषतया धोये राधातुतएवलाभात्‌। जानातीत्या
दावाश्रयत्वं प्रत्ययस्यार्थ इति स्वीकृतस्य न्नार्थत्वस्य व्याप्तिसत्वात्‌। न हि यत्नमंतरेण ज्ञानं नोदेतीति काचिदभ्युपे
तिस्यात्तरहतानि तिष्ठंत्येवल कृणं पटुत्वमिति कर्त्रर्थकत्वमभ्युपेयं। एतेन कर्त्रधिकरणोव्याख्यातवाच्यत्वं कर्त्तुर्निरस्त
ज्ञं भ्रममानाधिकरणो यदं ता हि हितस्यजं जं भ्रमान इति प्रानचः कर्तृत्वाचकत्वं स्वीकुर्वतो पी मीमांसका अपि प्रयुक्ताः।

४ यत्तु तैरुक्तं शानजादेशे कर्त्तरि हृदि स्थितिर्व्याकरणं शक्तिग्राहकमस्तीति तन्न दृष्टा काशेर्यौ ह्यवमर्थाकांक्षायामनिर्दिष्टार्थे युगपतुत्वादिवे
वोपतिष्ठते आकांक्षितविधानं स्यात् इति भाष्यात् न तु शानजादिषु स्थानिभूतलकारार्थे नैव तेषां निराकांक्षत्वात् अन्यथा भावे कर्मणि च
शानचौ दौर्लभ्यापत्तेः तत्स्थश्रूयमाणेनैवाख्यातेनैव प्राप्तत्वात् इत्यादि प्रयोगाभावेन स्यात् कर्मणि तु क्रियमाण इत्यादि प्रयोगोऽनस्या
त् यत्तु भट्टपादा आहुः कर्त्तरि पदे कर्तृत्वं न तिङ्कर्त्तरीत्यादिकं तत्तस्य इत्यादिकर्मणा न कर्मणीत्यस्य द्व्येकयोरित्यादेश्चैव
वाप्ततया व्याख्यानान्न कर्तुर्वाच्यतासूत्रादायातीति तन्न विंसा तामेकवचनद्विवचनेति विहितद्विवचनादिसंज्ञा हीति बाधादप्रा
निष्ठातत्स्थद्विवचनादिसंज्ञकतिबादिविधिना द्व्येकयोरित्यस्यैकवाक्यतास्तु न च तिबादिविधौ कर्त्तरीत्यस्ति पद्धितैकवाक्यादिवि
शेषणतया कथं विज्ञायेत ननु लः कर्मणीति सूत्रे कर्त्तरीत्यनुवृत्तं कर्तृग्रहणं तिबादिविधावस्येव लविधितिवादिविध्या
द्येकवाक्यतास्वीकारादिति चेत्समं वाक्यैकवाक्यता हि सा न तु पदैकवाक्यता लः कर्मणीति विहितलकारानुवादेन तिबादे
शविधेः प्रवृत्तत्वात् तथा च लविधौ श्रूयमाणं कर्तृग्रहणं कथं संख्यां विशिनष्टु न हि यत्र कर्तृग्रहणं तत्र संख्योपस्थापकम
स्ति लकारस्य द्विवचनादिसंज्ञाविनिर्मुक्तत्वात् तत्र कर्त्तरि पदैकत्वमिति व्याख्या कथमपि न संभवत्येवास्मादेतन्न लःक
र्मणीति सूत्रे लग्रहणमकारानुबंधकयोर्लट्लृटोः सामान्यग्रहणं न भवतीति किंतु सर्वानुबंधकलकाराणां सामान्यग्रहणमिति राम
निर्विवादं तत्र लट् इति जसंतमाम्नातं किंतु ङसंतमस्तु लः परस्मैपदमिति वत् आदेशापेक्षया चेयं षष्ठी अस्य च आदेशाः सक ४

र्मणि चेत्यादि न वा विहितस्य लस्यानुवादो न संभवतीति वाच्यं वर्त्तमाने लडित्यादिभिरेव लविधानात् तथा च लस्य स्थानेऽप आदेशाः
सः सकर्मकात् कर्मणि कर्त्तरि च स्यादकर्मकाद्भावे कर्त्तरि चेत्यर्थः सुलभ इति भट्टपादोक्त्या योजनिका निर्बाधैवेदं चाहुः लट् इत्यस्य षष्ठ्यंतत्वे
आदेशानामेवार्थे उक्तः स्यात् सोऽपि तिबादीनामेव न तु शानजादीनां तेषां हि वचनादिसंज्ञाविरहात् द्व्येकयोरित्यादिनाऽस्यैकवाक्यतायाम
वश्निरुक्तत्वात् न च भवदुक्तरीत्या कर्त्तरि हृदि स्थितेन विनिर्वाहः भावे कर्मणि च शानचौ दौर्लभ्यापत्तेरुक्तत्वात् न च शानज्विधिना सहास्यैकवाक्यत्वेने
पदस्य स्थापकतामेव व्याख्यातपाभावकर्मणोरिष्यतेनेष्टसिद्धिः सकर्मकादपि भावे शानजायतेः किं च जसंतत्वे श्रुते नैव संबंधः षष्ठ्यां
न तेनादेशा इत्यपाहाराहौरवमित्यादि अत्रेदं बोध्यं भावे चाकर्मकोऽप्ययं सकर्मकग्रहणाभाविवक्षितकर्मणोऽपि ग्रहणं तेनाऽत एव रोर
णाविति सूत्रे तेहपव्यातेनेह मुझ्यते इति भावे लकार इति हरदत्तः अमंता विद्यमानकर्मकाणामेव ग्रहणं नेह पच्यत इत्यादौ तु क
र्मण्येव लकारः गम्यमानवाचकमेन प्रयुज्यते इति मतांतरे मतज्ञ गति बुद्ध्यादिसूत्रे हरदत्तग्रंथे स्पष्टं अयं तु कैश्चिदुक्तं अविवक्षित
कर्मणां भावे लकार इति प्रसादकृतोक्तं भाष्यादिविरोधादयुक्तमिति तद्विंत्यं पठ्ह यस्याविभाष्यके यटादिग्रंथारूढत्वात् प्रसुता
विवक्षितकर्मणोऽप्यकर्मका इति पक्षस्यैव प्रबलत्वात् हि समानकर्तृकेषु तुमुन् इति सूत्रे स्पष्टता कियोन इति भावे लुट् नो हरदत्तेन
रोरंध्ये नेहक्तमिति सूत्रे कैयटहरदत्तादिभिरपि नपुंसके भावे क्तो कर्मकेभ्य एव तयोरेव कृत्यक्तखलर्था इत्यत्र मात्रस्य ग्रहणात्तत्रभा
वे वा कर्मकेभ्य इत्यनुवर्त्तनादसपाघटं कृतमिति प्रसक्तेति सिद्धांतितं एवं स्थिते यद्यविवक्षितकर्मणोपीह सत्त्वे कर्मकग्रहणेन नार

हेरस्त्वनर्हि पीता गावो भुक्ता ब्राह्मणा इत्यादौ भाविक्तान्तादर्शेऽत्राघाजित्यादिकर्मणीक्त इति सूत्रे हरदत्तेन वक्ष्यमाणत्वात्। तत्र हवोऽस्त्र भावेक्त इ
तिकैयटाद्युक्तं च कथं संगच्छतां। कथं वा गतं निरस्त्रीन मित्यादिप्रयोगाः संगच्छेरन्। गतिबुद्धीति सूत्रेऽत्र कर्मकग्रहणेनाविवक्षितकर्मणो
नग्रहणं त इत्युक्तं। तेन रणे यः कर्त्ता स गण्यं ते कर्म न भवतीति देवदत्तेन पाचयतीति सिद्धं। गत्यर्थाकर्मकेति सूत्रेऽपि नग्रहणं तेते न हि सूत्रेणाक
र्त्तर्यपि क्तो विधीयत इति दत्तवान् पक्ववान् इत्यादावर्थे दत्तः पक्व इत्याद्यापत्तेः। इह सूत्रेऽविवक्षितकर्मणामकर्मत्वेन ग्रहणे न कोऽपि दोष इ
त्याकांतत। लस्यावर्णग्रहणे प्रत्ययग्रहणपरिभाषा। एवं च ग्रहणपरिभाषा च न प्रवर्त्तते इति लुनाति च उत्तल इत्यादौ तिबाद्यादेशः। कु
तो न भवतीति चेत्। अत्राहुः। लः कर्मणीति सूत्रे निर्दिष्टानां कर्त्राद्यर्थानामनुवृत्तेः कर्त्राद्यर्थे विहितस्य लकारस्य ग्रहणमिति। अतो वि
तिबाद्यादेशानुवादेन कर्त्राद्यर्थविधिरिति कल्पना निरस्ता। लस्थानिकतिबादीनां कर्त्राद्यर्थविधानं कर्त्राद्यर्थे विहितस्य लस्य तिबादि
विधानमित्यस्योभयमाश्रयापत्तेः। उत्तधातोरित्यधिकारात् धातोर्विहितस्यैव लस्येह ग्रहणमिति नोत्रातिप्रसंगः। लस्य संज्ञा तु न भवति फला
भावात्। न च लित्स्वटः फलं णलो लित्वेन तदभावस्य ज्ञापनात्। नाप्यश्रवणमेव फलं तत्रुच्चारणस्यानर्थकत्वापत्तेरादेशविधिवैयर्थ्याच्च णला
भावात्। लस्य तिबादिस्थानित्वात् सुपगमे तु लः परस्मैपदमित्यादि स्वरसतः संगच्छत इति दिक्। तिप्तस्झि। समाहारे द्वंद्वः। इटः टकारस्याग्रम
लिंगं न भवति सूत्रदर्शनादिरादेशः सामर्थ्याहारात्। किंतु इटो दिति विशेषणार्थः। एरदिति सुग्रमाने एथे चेव हि एथे महीत्यत्रापि स्यात्तवर्णा राम
प्रत्ययग्रहणार्थवद्ग्रहणपरिभाषयोरप्रवृत्तेः। केचित्तु इटो दिति सत्र लिङ् इत्यनुवर्त्तनाल्लिङादेशस्यैवर्णस्येति सामानाधिकरण्येन व्याख्याने एथे वहि ९

एथे महीमादावतिप्रसंगो नास्त्येव। न हि त्तकारमात्रमादेशो भवतीति नेटो दित्यत्र टकारः स्पष्टप्रतिपत्त्यर्थ एवेत्याहुः। तद्विमंसा। इकारस्य
विशेषणात्ते विशेषणेन तदंतग्रहणादिवर्णांतस्य लिङोत्स्यादित्यर्थप्रसन्नात्त्वानातिप्रसंगस्तदवस्थत्वात्। वहि महीमस्यापिस्या
निवर्तनेन लिङ्त्वात्। महिङो ङकारस्तु ङितिइति प्रत्याहारार्थः स च समुदायानुबंधो न त्ववयवानुबंधो व्याख्यानान्नेनेषः कर्मणि अप्रा
लिङि एषिषीमहीमव गुणानिषेधेन। तथा हस्त्रेते एछ्ते अकर्मणि लि देवब्रश्चिमहे यज्ञाछिमहे इत्यत्र ग्रहिज्येति संप्रसारणं न
तद्धानौ। लस्य तस्यानुवृत्तेर्लोटे प्राप्नोति नागच्छत इत्याशयेनाह शानच्कानचोचेति। तेन परस्मैयदिम्योपितालादौ। स्पवयोवदनेति वा
नशमवत्सेवाकतो हनिघ्नानाः। अनुदात्तङितः। अनुदात्तश्च ङश्च अनुदात्तङौ तौ इतौ यस्य सः अनुदात्तङित्। द्वंद्वांते श्रूयमाणस्य
द्वः प्रत्येकं संबध्यते तत्रानुदात्तांशे तदंतविधेः फलाभावात् अंशांतर एव तदंतग्रहणमित्याशयेनाहानुदात्तेत इत्यादि। उपदेशे
ऽनुनासिक इदित्यतोनुवृत्तमुपदेशग्रहणमपि ङिदंश एव संबध्यते नाम्नां। अव्यभिचारात्तदाह। उपदेशे यो ङिदिति
विशेष्यमंतरेण तदंतविधिरिह दुर्लभ इत्यत आह धातोरिति। लस्येति। नन्वि। हानुवृत्तेरभावाद्भयमपि दुर्लभं। स्वादय इ
ति सूत्रात् धूङ्सुभानुवृत्तस्य धातव इत्यस्य विभक्तिविपरिणामात् धंचिद्धातोरिति पदे लब्धेपि लस्येत्येतन्न लभ्यत इति चे
दत्राहुः। इको झलितसत्र सना धातोरिवेहात्मनेपदेन लकारधात्वोराक्षेपो बोध्यः। तिङां लादेशत्वाल्लस्य धातोर्विक्षानादिति।
उपदेश इति किं। चुकुटिषति। गाङ्कुटादिभ्य इति सनः त्रानिदेशिकं ङित्त्वं। धातोः किं। चढुङ्गंमाम्हत्त्व। अङुङुपत्र। अयोच

सि॰
प॰नं॰ ६

त्वाननुलावस्थायामेव हृतादिभ्यः स्यतासीत्यादिना स्यप्रत्यये कृते व्यवधानादात्मनेपद परस्मैपद रूपनियमाप्रवृत्तावपि लकारसामान्याश्र
यत्वेनांतरंगत्वात्स्यप्रत्ययात्पूर्वमेव लस्य तिबादिषु सत्सु परस्मैपदं पक्षे चात्मनेपदं सिध्यत्येवेति वृद्भ्यः स्यसनोरिति स्यसनोर्ग्रहणं व्यर्थं
सत्तत्त्वैव स्यग्रहणोन विकरणेभ्यो नियमो बलीयानिति विज्ञापितं तेनानुदात्तेत्वाद्वन्त्स्यते इत्येवं नित्यमात्मनेपदे प्राप्ते वृद्भ्यः स्यसनोरिति
परस्मैपदमपि पक्षे भवति। तथा च विकरणेभ्यो नियमस्य बलीयस्त्वाद्ध्वङ् द्योतंदोषः। विकरणात्प्रागेव परस्मैपदप्रवृत्तेरिति चेत्स्यसं
स्यग्रहणं विकरणाव्यवधाने नियमप्रवृत्तिं ज्ञापयतीति पक्षे च ङ्द्योदोषः स्यादेवायं पक्षः प्राचीनशिष्यत इति स्वस्त्रेभाष्ये केयटे यः स्वरः
किंच तदंतविधिलाभार्थं मपि धातुग्रहणमावश्यकं। धातोरेकाचश्च्यादिनापङ् बोभूयेत अतेरीयङ् अतीयते शेते इत्यत्र तुवप
दे शिवद्भावे न ङिदंतत्वं। नमो वरिवश्चित्रङ् इति क्यचि विधीयते इत्येतत्कथमिति चेद्वाक्तुः। अवयवे च रितार्थो इकारः वाजंतस्य विशे
षणं भवति। तथा च समुदायानुबंधो ङकार इति अपदे शिवद्भावेनैव ङिदंतत्वं बोध्यमिति। स्वरितञितः। पूर्ववदिह कृत्ये संबध्य
ते। कर्त्रभिप्रेत इति गच्छतीति कर्त्रभिप्रायं कर्मफलं। धौतोरिति। धातोर्लस्येत्यर्थः। लकार धातोराकृष्यः एवं च होध्यः। तिङ्स्त्रीणित्रीणि
तिङः षट्त्रिकाः संज्ञास्तु तिस्र इति यथासंख्यं नस्याती। यत्र आह ङमपोरिति। परस्मैपदमात्मनेपदमिति वानुवर्तते तेन पदद्वये प्रत्ये
कं त्रयस्त्रिका इति यथासंख्यं संज्ञाः प्रवर्तंत इति भावः। ननु प्रथमश्च प्रथमश्च प्रथमौ मध्यमश्च मध्यमश्च मध्यमौ विसेवंहंते कशेषाराप्र राम
थमादीनां प्रथमौ च मध्यमौ च उत्तमौ च प्रथम मध्यमोत्तमा इति द्वंद्वे अभ्युपगते त्रिकद्वयस्य त्रिकद्वयस्य यथासंख्यं प्रथममध्यमोत्तमसंज्ञाः ६

सुः न त्वेकैकस्येति। लुत्तमो वेतिसत्त्वं विरुध्येत। गालङ्त्तमसंतकत्वात्। भात्। तत्र प्रथम मध्यमोत्तमाः इमनच्क्तद्वंद्वानां प्रथममध्यमोत्तमाश्च
प्रथममध्यमोत्तमाश्चेत्येकशेषश्चाश्रीयतां। नथाहि सतिसंज्ञाश्रपिबडिति परस्मैपदात्मनेपदग्रहणानुवृत्तिःकेशं विनैवेष्टसिद्धिरिति चेन्मै
वं। एकशेषाश्रयणे गोस्वाहे पछ्यो भवात्। यापि हि परस्मैपदात्मनेपदग्रहणमनुवर्त्यमेव। अन्यथा शरद्वसोः सावकाशा परस्मैपदसंज्ञाप्रथ
मादिसंज्ञया बाध्येत। ततश्च न्यामपतिन्यामतीत्यादौ क्रमः परस्मैपदे षितिदीर्घो न स्यात्। अक्रामन्नित्यादौ तस्यसावकाशत्वात्। परस्मैपदाना
मिति विहितस्य णलो गालुत्तमो वेति णित्त्वविकल्पविधानाज्ज्ञापकात्परस्मैपदसंज्ञा प्रथमादिसंज्ञया न बाध्यत इति वृषेत। हिंसुतरां प्रति
पत्तिगौरवं। तान्येकवचनत्। तानीत्यस्य व्याख्यानं लब्धेत्यादि। अन्यथा एकसंज्ञाधिकारात्प्रथमादिसंज्ञा नामेकवचनादिसंज्ञानां च पर्यायःस्या
त्। द्वयेकयोर्द्विवचनैकवचने इति सूत्रे एकत्व विवक्षायामुत्तमसंज्ञाभावाद्गुत्तमस्येत्यस्याप्रवृत्त्या अङ्गात्यादिप्रयोगोऽपि साधुः स्या
दिति भावः। प्रत्येकमिति। यत्तु प्राचाप्येकैकशः इत्युक्तं तदयुक्तं शसैवपिप्सायाउक्तत्वेन द्विर्वचनायोगात्। येन नाप्राप्ति न्यायेन हि
र्वचनापवादः शसिति सिद्धांतात्। तथा सुपइति सूत्रेप्येकैकश इति प्राचोक्तमयुक्तमेव। एतच्च मनोरमायां ग्रन्थानुरोधेनोक्तं। अन्ये तु एकै
कमेवैकैकशः स्वार्थेशस्त्वनत्वे वीप्सायां। न च स्वार्थे यः शसस्याकरग्रन्थात्वावगम्यत इति वाच्यं। एकाकपिलाएकैकश। सहस्रद्वैत्रो
दत्तेति भाष्यात्। शसंतस्य प्रत्येकमित्यर्थकत्वेन केपटेन व्याख्यातत्वात्। थिंकस्या। पिशसो। वगम्यमानत्वात्। ततश्च एकैकश इति प्रा
चोक्तमयुक्तमिति यदुक्तं तदेवायुक्तमित्याहुः। युष्मदि। समानाधिकरणा इत्यस्य व्याख्यानं तिङ्वाच्यकारकवाचिनीति। भिन्नप्रवृत्तिनि

१ तृ०
२

भिन्नानांशब्दानामेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यं स्थानिनीत्यस्याख्यातमप्युच्यमानइति समानाधिकरणोर्विं। त्वंपचसीतित्वयाक्रिय
तेतुभ्यंददातिमत्तोयपदइतिसप्तम्यं तस्यानुगुणानेनछात्रवर्धेनस्मिन्नवृत्तिर्भूतेसती। तिनस्माद्धातोर्लस्यस्थानेइत्यर्थः। तथाचतदिति
तिद्वाच्यकारकवाचिनिप्रयुज्यमानेऽप्रयुज्यमानेचेत्यर्थः। तिङ्शित्। धातोरधिकारोक्ताइतिर्किं। हरीन्प्रासः सार्वधातुकमपिदितिङित्येघिढिं
तीतिगुणःस्यात्। लिहः क्रियइत्यादिशसंतेपुसार्वधातुकेमगितिप्रस्यात्। केचित्तुवारिणीत्यत्रनुमिङ्क्तेपिलघूपधगुणःस्यादित्याकुलत्वा
ङ्गितीतिनिषेधात्। इगंतत्वप्रयुक्तस्यनुमःगुणाप्रयोजकत्वेसंविज्ञायतपरिभाषाविरोधाद्वा। कर्तरिशप्। सार्वधातुकेयगित्यतःसार्वधातुकइत्य
नुवर्त्ततेधातोरेकाचइतिस्त्राद्धातोरितिचातद्यःकर्त्रर्थइत्यादिदृष्टांतः। तकारादकारउच्चारणार्थः। आयनेयीनीतियस्त्वात्पत्तनयग्रहणमनु
वर्त्ततेनत्वादिग्रहणमेकदेशस्वरितत्वप्रतिज्ञानात्। तस्याप्यनुवृत्तौतुशयांतेइतिनसिध्येत। शीङोलेः। इत्येवडादिविसंतरंगत्वादंतादेशात्मागा
टिकृतेप्रत्ययादित्वाभावात्रदेतदाह। त्वत्ययावयवस्येति। प्राचातुप्रत्ययादेःस्यस्येत्युक्तंतदनेनपरास्तं। इहमनोरमायामादिग्रहणं निवृत्त
मित्युक्तंतदाचातः। अन्यथाप्रवृत्तस्यादिग्रहणस्यनिवृत्तर्वयोगात्। निवृत्तमितिस्यानानुवृत्तमित्यर्थइतिवाच्यं। चित्त्वाद्वेयम।
यत्तुप्रत्ययादेरितिग्रंथस्समर्थनायवाचवृत्तेः। आड्गमेकृतेनतस्यहित्वोपिप्रत्ययोस्तुनाम नतुतत्सहितस्यैवप्रत्ययइतिनियमोस्ती
तितन्न। अवयवविनिर्मुक्तस्यावयविनायोगात्। अन्यथाभूयास्तामित्यादौतामादीनामिडागमापत्तेः। ननुअगमस्यप्रत्ययस्य
इत्यासुडंतंतुनांगमितिचेन्न। आगमविनिर्मुक्तस्यापिप्रत्ययत्वमितिवदतांमतेभवामिभविष्यामीत्यादौविकरणांतस्यैवतदादिग्रहणाव राम
७

लेनयासुडंतस्याप्यंगत्वाद्यादुर्वारत्वात्। किंचलविषयेप्रत्ययविशेषविहितत्वात्सोपिदृकृतेलिङःस्थानेइडतस्यागमेनादित्वविघातात्तस्याद्युदात्त
त्वंनप्राप्नोतीत्याशंक्यप्रत्ययस्वरेकर्त्तव्येआगमाअविद्यमानवदितिसतिदेशइआद्युदात्तश्चेतिसूत्रेभाष्यादौस्वीकृतः। नचैतत्केवलस्यापिप्रत्ययत्वेयुक्तं
नचतत्प्रतेआगमसहितस्यापिप्रत्ययत्वादिकारस्याप्युदात्तःस्यात्तद्वारणायप्रत्ययस्वरेकर्त्तव्ये इत्याद्यिंथःस्वीकर्त्तव्यएवतिनस्पिदाकरसंधविशेष
इतिवाच्यं। आगमाअनुदात्ताइतिविशेषवचनेनागमस्याप्यनुदात्तत्वेकृतेआद्युदात्तत्वस्यतत्राप्रवृत्तेरितिदिक्। शप्सेति। शकारादकारउच्चारणार्थः।
अतोगुणइति। अतोदीर्घोयञीतितुनप्रवर्त्ततेस्थानमत्वादेशविधौस्थानिवत्वनिषेधादितिभावः। अतोदीर्घो। तुरुस्तुशम्यमइतिसूत्रात्सार्वधातु
कइत्यनुवर्त्तते। सार्वधातुकेकिं। केशवःअंगना। अतआइतिवक्तव्येदीर्घग्रहणंदीर्घएवयथास्यादित्येवमर्थं। अन्यथापाहिरोदनंदेवदत्तनलुप
चामिभोरित्यत्रानेनस्यापिप्रश्नात्स्यात्प्रयोरितिप्लुतःस्यात्। किंचतु। अतआदितिसुवचंतपरकरणसामर्थ्याद्विकारनिवृत्तिर्भवेदिति
प्लुतस्याप्रसंगात्। उदात्तस्थानेउदात्तआकारः अनुदात्तस्थानेऽनुदात्तआकारइत्यादितुस्थानेंतरतमइत्यनेनैवसिद्धं। अतएवदृष्पाठप्य
मीतिसूत्रेवृत्तिपाकपिशत्वेमध्योदात्तएकएवोदात्ततत्प्रयोजयत्यस्यादिषुतुस्थानेंतरतमस्येवसिद्धमितिमनोरमादावुक्तं। तत्तप्रयो
जनाभावात्तपरकरणमनर्थकविध्यर्थमितिनाशंकनीयमेव। यदितुहल्स्याबभ्यइमच्चआआबितिवत्तस्यतआइत्यत्रोपिआआइति
प्रश्लिष्य:क्रियतेतदातपरकरणंविनापीष्टसिद्धिरित्याद्युः। द्युहासेचेतिसूत्रस्योदाहरणमाह। एहिमन्येइति। ओदनंभोक्ष्यसेइत्रितंम
न्यसेइत्यर्थः। एतंएतवेति। एतंमन्येओदनंभोक्ष्येएतमन्येओदनेभोक्ष्यधरमन्यपःभोक्ष्यावहेइतियुवांमन्येथेभोक्ष्यामहेइतिद्धं

मन्यध्वे इति क्रमेणार्थः। परोक्षे लिट्। प्रत्ययाधिकाराद्व्यापाररूपा क्रियासर्वापरोक्षे नैवाऽनुमातुं हि। माध्वे। क्रियानामेयमत्यंतापरिदृष्टा सर्वापराभूता
वयवान शक्यपिंडीभूता निदर्शयितुमिति। तथापि तदनुकूलश्शक्तिमत्ताव्यापारा विशेषानां साधनानां पारोक्ष्यमिह विवक्षितं तेन क्रियाना विष्ठसाध
नमात्रपरोक्षे पि लिड् भवत्येव। अयं यथा च तत्वं पेविषयः। ननु क्रियाशब्दवाच्या धिश्रयणादिव्यापारा रारा युगपत्वज्ञा विषयत्वेपि क्रमशः प्रत्यक्षवि
षयत्वमस्ति। यत्र तु क्रमशोपि प्रत्यक्षविषयत्वं नास्ति तत्र हि पारोक्ष्यं क्रियायाः। तत्र चालि घुत्तमपुरुषो दुर्लभ इति चेत् सत्यं। स्वव्यापारस्यापि
वर्त्तमानतादशायां मासंगादिना स्वयमप्रतिसंधाने तत्तः कार्येणानुमितौ भवत्येव। वक्रं जगद पुरस्तात्स्य मत्ता। किं नाहमिति च दिति। लि
हा। आहे धातुकसंज्ञ एवेति। लङः प्राकटायनस्येति सूत्राद्देवकारोनुवर्त्तत इति भावः॥ परस्मैपदानां। अत्र यथा इहस्य अकारो विधीयमानत्वं
अंत्यस्य प्राप्नोति। न वाकारस्याकारविधौ निरर्थकत्वमिति वाच्यं। यथासंख्यसंपादनेन चरितार्थत्वात्। अत आहुः। धातोरित्यधिकारादादेः पर
स्येति अणनमात्रस्य हि त्वेद्द्वयोरतो गुणा इति पररूपं। यद्वा द्वयोरकारयोः पररूपेणास्त्वेव निर्देशस्तथा चानेकाल्त्वात्सर्वादेशो सिद्ध मिश्र मिति
।ननु सुवंतानामेव हद्वस्तत्र त्वकारद्वयकल्पनायां सवर्णदीर्घेनेकाल्त्वाद्धर्म एवस्यादिति चेत्कैवं। आदेशानां स्थान्यर्थेनैवार्थवत्वात्। यथत्वस्य
विधीयमानमकारद्वयप्रत्येकमर्थवन्न भवतीति समुदितस्य प्रातिपदिकत्वेनातो गुणा इति पररूपस्यैव प्रवृत्तेः। सुवोवुकू अविमृशानिति सूत्रा
इची मतु पर्त्ते तोत दाह हल्लुङ् लिटोरचीति। अचोतिकिं। अभूत्। अभूः। वुकि सति लोपो व्योरिति लोपं बाधित्वा परत्वाद्धल्ङ्यादिलोपः स्यात् राम
।ननु हल्ङ्यादिलोपादंतरंगत्वाल्लोपो व्योरिति लोप एव भविष्यति। तथा च समभ्यते यङ्लुगंताह्रुङिति पर्वसि पोरमागत अमा मङस्सवालौ ८

पद्भ्यमाध्वादिभिंस्वाहितः एवं चाद्भ्यहरणं ऊडु पधायाः इत्युत्तरार्थमनुवर्त्तमानमिहापुपरंज्ञकत्तयाह हिकारादिमध्यौ जितंनत्वावश्यकत
येवस्येनि छघंड वितत इति चेत्तत्राहुः। भुवोवुगित्यस्यांगत्वाद्धहूपेट् वेन हल्ङ्यादिलोपस्यैव वुकोपि बहिरंगतया असिद्धत्वे सति बलि
लोपस्य प्राप्तेरेवाभावाद्ग्रहणमिहार्थमपीत्येवयुक्तमिति। अपवंशकायंथः समाधानमंथस्य मनोरमायां स्थितः। अत एव आः। मध्यति
यङ्लुगंत एव नात्र सिद्ध्य मामद्द्व्यादिरूपं तु हराव्यास्तमेव। एकास्वकारांतानाम्र ठभा विनापङ्लुङ्नास्तीति क्रोष्टङिति सत्रे माध्यध
नितंकैयटेन च स्पष्टीकृतं। इदं च क्रोरिति यवीवृत हि पयकं। ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च ऊठ् उभाविनोः सिविमव्यस्तु यङ्लुगंतस्यैवेति न्याय्यं। माधवादिसंमतं
च। मव्यवंधने। अयं यांतरंऊड् भावाति मूले वस्त्समारगतत्वात्तथा च तद्वं यथेन सहाचन्यमनोरमायंथयोर्विरुध्यतरत्याहुः। यदितु मवतेर्य
ङ्लुगंतस्यादि तिमनोरमायां पवपे तत्वदा तत्र पूर्वापरग्रंथविरोधो नास्तीति दिक्। अजादेरिति पदे बहुव्रीहेः षष्ठी तदा इदंस्मान्मन इद
तिरूं इयति इन्द्र। पितुमिच्छति इं दिद्र पिपतीत्यत्रदकारस्य तद्धादिति हि न निषेधःस्यात्। किं तु अभ्यासावादिश्याजादित्वस्मादिति कर्म
धारयादेवायं चमी। तदाह। आदिभूतादचः परस्येति। भूच भूच इति। पच ध्यध्वेत्ध्वापत्वं प्राप्य मंचनसंगच्छतेतथा। पित्थदे शि
वद्भावेनतद्धोर्ध्वं। नन्विहचत्वारएकाचः। तत्राद्यवयवाद्वय। भूःऊऊ इति भविति समुदाय चातुर्थ। तथा चानियमेन यस्यकस्य। वि
न्वहित्वे स्यात्तमेवं। समुदायैकाच एव हिर्वचनस्यन्याप्यत्वात्। तस्मिंश्च द्विरुच्यमानेत्वययवान्यपि द्विरुक्तानि एव हर्ष चजनेस वां वयवद
त्वनवता। अचेति। एकाचो द्वे इति पकरणे। हलादिः। अभ्यासस्येति जानिपरो निर्देशः। तेन अनितनुः। आदतुरित्यादौ नाकारादिनिवृत्तिः

१२० सिद्धत्ति वि चिदभ्यासे आदेर्हलः सन्नमाश्रित्य सर्वत्रानादेर्लोप विधानात् भवतेरः। अत्र लोपोऽभ्यासस्येति सत्रादभ्यासग्रहणमनुवर्त्तते चत्त्वशा
वोक्तं। भवतेरिति कर्तृनिर्देशाद्वा वक्ष्यमाणोगोनीत्वमिति। व्याख्यातं वत्सत्येनेराा। कर्त्तर्थो श्लिपुष्यथो निर्देशादिस्थेरन्तिात् नान्यथा तु निर्देश माने श्रि
यो विधानात्। शप्सु विकरणत्वेनानर्थकत्वात्। कर्त्तर्थकं परे विहितस्यापि तस्य श्लिथ श्रिशात्त सामर्थ्याद्देवेह प्रवृत्तेः। अन्यथा तनुतुत्तरीत्या उपस
र्गात्सुनोति सुवतीत्यादीनामपि भावकर्मणोरप्रवृत्तेर्भवे यशुवव्यव स्यादत्र पसिद्धांतस्थाप मिति स्पस्थमेवाकरदशाम्। प्रयुञ्जते चवर्मरापपि
अकारेकवयः तस्मात पत्त्रं बिभराबभूवे। विभावरी भिर्बिभरांबभूव विरेइत्यादि। एतत्त्व प्रक्रियाप्रसादगं थहृष्यरांमनोरमायांस्थितं। अत्र न
याः श्रिप श्रिशान्त सामर्थ्याद्देवेह प्राप्यः प्रह त्तिरिति यदुक्तं तन्न। पिबतिर्णोयति दिसादौ पिबाद्यादेशप्रहत्त्यात्र त निवृत्त्याच शिसं तस्यचरितार्थ
त्वात्। एवं चोयस्स गास्तुनोति सुवति भवतेरः ध्यायतेः संप्रसारणं चेत्यादि निर्देशादकर्त्तृवाचिन्यपि परेशवादयइत्येव ख्यारव्येव। अन्यथा इक्ष
श्रियाविस त्रवस्य माणास्वयंथेन सह विरोधापत्तेः केचित्तु शित्त्वात्तिपः सार्वधातुकत्वेन भवति रिमाद्या वाधधातुकस्येङ्हलादेरिति इडागम
निहत्याब्रवीतिरित्यत्र ब्रुवईहेति ईडागमप्रहत्त्याव शितत्त्वरितार्थमिति व्याचख्युः। तन्निंत्यं तितुवेमनेनेरित नेषधातोरार्द्धधातुकत्वेपि इत्यमा
वात्। ब्रुवईडित्यत्र ब्रुवः परस्य हलादेः पित ईडागम इत्येतन्मूत्रस्य मूले व्याख्यातत्वात् सार्वधातुकस्येति विशेषणाभावेपि इत्यभावात्। नच
हलादेः पित्प्र सपस्य सार्वधातुकस्येति विशेषणाभावे ब्रुवो लिटि वचआदेशे सियः थलि इवचय्यत्र प्रवृत्ति प्रसंगः स्यादिति वाच्यं। यत्नोन्नपि राम
लोभावात्। नवस्यानिवद्भावेन पित्त्वंस्थः शानवः शितत्वेन लिंगेनक्व चिदनुबंधकार्येष्वनल्विधाविति निषेधात्तस्मादर्थेनरात्सेव श्लिपः शित्त्वसाम ६

पर्यादवकर्त्तर्थे पिशायः प्रह त्तिरिति ग्रंथो निराकर्त्तव्य इत्याहुः। तदपरेन्ये क्षमंते। यत्नः पित्त्वाभावे हलंयोगाद्धि किदित्ति किंतात्वहि चित्स्याति सं प्रसा
रणोस्तु वचिवथ वववचेति न सिध्येत्। किंतु उचिथ ऊचेयतिस्यात्। तस्मात् स्थानिवत्त्वेन यलः पित्त्वे भ्युपगते उवक्थेत्यादावत्तिप्रसंगवारणा
यपितः सार्वधातुकस्य ईडागम इति व्याख्यानमेव। न त्वा च ब्रवीतिरित्यत्र ईडागमप्रवृत्त्यापि त्वं वारितार्थमिति कौ श्विदुक्तं। तदपि
मप्यगेवेति। असिद्धवदत्रा भात्। वत्कारणं प्रत्तिपत्तिलाघवाय। अत्र मन्या सिद्धेश्वा सिद्धरतिप्रयुज्यमानमनुपपन्नं। सत्त्वसामर्थ्याद
सिद्धवदिति कल्पनीयं स्यात्। यथा राज भिन्ने पुरोहितेराजायमिति प्रयोगो राजवदिति कथं चित्कल्प्यपति। राजवदयं पुरोहित इत्युक्ते तुल्यप्र
वृत्तिप्रतिर्भवति। तथा चागमाषवतुकार सिद्ध इत्यत्रा सिद्धवदिति कल्प्यते। असंयोगाद्धिद्रू किदित्यत्रापि किद्वदित्यगत्यैव कल्प्यत इति
ज्ञेयं। आभादित्यभिविधौवाद्। भाधिकारमभिव्याप्येत्यर्थः। अधिकारस्थापं। अत्र यह रणं समानाश्रयप्रतिपत्त्यर्थं। आभाद्गहणं विषय
निर्देशार्थं भाधिकारस्या वधिलाभस्तु आगस्यात्प्रत्ययः परश्चेत्यादाविव व्याख्यानेनैवसिध्यति। एवं चानुदात्तोपदेशेत्यत्रा स्थाय स्थाने सम
यमवोभवति। एषामनुनासिक स्य लोपः स्यात् झलादौ क्ङिति परे सचासिद्धो भवति अत्र झलादिकिङ्त्यत्रिसेव यदाभीयं प्राप्नोति तस्मि
न्कर्त्तव्ये इति। जंगहि। जंघहि। अतो हेरिति लुङ्नभवति अनुनासिकलोपस्य हि श्रहा श्रितत्वेनासिद्धत्वात्। नन्वस्याधिकारस्येयत्त्वपत्तोपस्था
नं तत एवारभ्यपदाभीयंतस्मिन्नेव कर्त्तव्ये। सिद्धत्वं स्यान्न तु ततः पूर्वस्मिन्नपि। तत्तपद्मसोरिमेत्तंद्दर्वस्मिान्भिन्ने कर्त्तव्येनासिद्धं स्यादिति चे
न्न भवेदयं दोषः आद्य धिकारोअर्थाधिकारस्तयो तत्तव्येह आन्नलोयइत्यवधिर्निर्गोनीतः स एव प्रतिसूत्रमुपतिष्ठते तदतेसकलमभिप्रेत्याह इत्तद्धं

मिति। अत्रापि शास्त्रासिद्धत्वमेव आकरे स्थितं। तेन एधिशाधीत्यत्र स्थानिनोऽसत्वं तत्र बुद्धिर निवर्तितं तत्वात्त्रिबंधनं कुलं सत्यो हेहिंरिति
चितं सिध्यति। प्राचोऽत्र कार्यासिद्धत्वपक्षे तु नासिध्यति। देवदत्तस्य हंतरि हते देवदत्तस्य जीवनं नेति न्यायेन एत्वविधिनाऽल्लपृष्ठो निवर्तिता
यांपश्चादेत्वबुद्धिनिवर्तनेऽपि धित्वकार्यस्याप्रवृत्तेरिसाद्धू। समानाश्रये इति किं। पपुषः चिच्युषः लुलुवुषः। इह या धातोः वि नोलुलस्य
परस्य वसोः संप्रसारणां तदाश्रितो लोप इति वेया लोपे एरनेकाच इति यण् पुवङ् चकर्त्रमेणासिद्धं। आल्लोपादाविति सिद्धं संप्रसारणं तु
विभक्त्याश्रितत्वमाश्रयतात्। न च बहिरंगत्वेनासिद्धत्वाश्विति शंक्यानाजानंतर्यं इति निषेधात्। वाहऊठ् ऊवस्य बहिरंगपरिभाषया अ
भीयत्वेनआल्लोपादिषु कर्तव्येष्वसिद्धत्वान्नवोऽत्र परिभाषायाआल्लोपादावस्मा नाश्रयत्वेनेति शंक्यं। वसोः संप्रसारतो हतेह
जोधाश्रयेणाल्लोपादौ निवर्तनः। तेते षु कर्तव्येषु संप्रसारणास्य असिद्धत्वायत द्विषये बहिरंगपरिभाषापि प्रवर्तते। तरतिने यांत्सता दि
तिदिशा विषयलाभार्थं आभाद्धहणं किं। आभीयं प्रसेवाभीयमसिद्धं नानं प्रतीतियथास्यादित्येवमर्थं। तेनन्न भाजिरागस्यत्र भं
ते अवि। णिरंजेश्च घत्रिवभावकरणायो। शितिनलोपेहंतेतस्यासिद्धत्वाभावादतत्रपधाया इति हद्धिर्भवति। साद्धुः। स्यादेतत्।
देभतुः देभुरित्यत्रश्रंथिग्रंथिदंभो नित्वस्याभावश्चनेनेन लिटः कित्वान्न लोपेऽभ्यासलोपौ न स्यातां नलोपस्यासिद्धत्वात्। अ
त्राद्धः श्नसोरल्लोप इति तपरकरणात् छिंगादो भीया सिद्धत्वमनित्यमिति नास्त्ययं दोषः तपरकरणं हि आस्तामित्यत्र आल्लोपस्य लोपो राम
मा भूदित्येतदर्थं। यद्यादागमः श्नसोरल्लोपं प्रत्याभीयत्वेनासिद्धः स्यात्तर्हि किं तेन तपरकरणेन। एवं चंदंभेभ्वेतिवत्समाणानामदीर्घत्वं किंर्दि १०

वनित्यत्वबलस्मयेमेवेति। बुवोवुक्। शास्त्रस्य एवमयेपि। यथुऽउदाहरणां तुदिदीयेबभूवेति। अत्र प्रावोइंधिभवतिभ्यांवेतिसत्रेपितोपिलि
टः कित्वार्थमिति व्याख्याचोज्ञातौ तिर्हदृडद्रोः। तिचेतिचेति निषेध इत्यत्र तदुपेष्टि तां इग्लक्षणयोरेवगुणवृद्धोर्निषेध इतिसि
द्धांतात्। अन्यथा उकस्यानिकयोर्निषेधे लिंगवाचनस्यचापित्त्वाद्धिर्न स्यात्। नचात्र कित्त्वसामर्थ्यादनिग्लक्षणयापिवृद्धेर्निषे
ध इति वाच्यं। थलिअत्रमेणालिवगुणनिषेधेन कितस्य चरितार्थत्वात्। तस्तवंतु प्रमास्यात्तमेवा वरेत्तथा चवार्तिके इंधेश्छंदो वि
षयत्वात् भुवोवुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति। यद्यपीह शाब्दांतरंग आभुवुको नित्यत्वं नास्तितथापिवृत्ताकृत
प्रसंगित्वमात्रेणापि वृद्धिविनिश्चयताख्यातिरिति पत्नोऽप्यस्मादेव वार्तिकादवगम्यते। तेन रथे शीविप्रामायिजपधीरवृद्धिं वाधित्वा
नित्यत्वात्तरधिनभोऽरितिनुमिहतजेर्धयतीति सिद्धं। नन्वेवमपि संयोगात्परस्यालिटः कित्वार्थं इंधेश्च संयोगेक्ति नएव। अन
थासमीधेदस्युहत्तममित्यत्र इंधेर्नलोपो न स्यात्। मैवं छंदस्युभयथेति सत्रेणाहिसार्वधातुकसंज्ञा आर्धधातुकसंज्ञाच विधीय
तेतेन सार्वधातुकमपिदितिज़िदोऽङित्वेस्यादेवनलोपइतिवार्तिकाशयात्। अत्रतमाः। बभूवेत्यत्र द्विर्वचनेचीसज्ञादेश
स्यानिषेधाद्गुणवृद्धिभ्यांप्रागेव बुकःप्रवृत्त्याभुवोवुकोनित्यत्वादितिवार्तिके नित्यत्वादिति हेतूपन्यासो निष्प्रयोजनः। शाब्दा
तरत्वात् भुवुको नित्यत्वं नास्ती सशकाकृताकृतप्रसंगित्वमात्रेणापि वृद्धिवित्वनित्यत्वं स्वीकृतं इत्यादिसमाधानमपि व्यर्थमे
वेत्याहुः। स्वपमेव समादधुः पाष्टहित्व पकरणां नेहि वार्तिकहृता द्विर्वचिप्रतिषेधः। यद्यपि द्विर्वचनं परत्वाद्यावादेशाल्लोपाप

धालोपणिलोपकिकितोरूत्वेम्पइति।तथाचूर्हिर्वचनेवी।तिस्त्रन्नारंभणीयमित्याशयेननित्यत्वादितिहेतुरूपन्यस्तइति।दिर्वचनेचातिसू
त्रेणाकृतादेशस्यस्थानिवद्भावोविधीयतइतिपक्षेतुहित्वाप्रागेवषष्ठ्यादेशस्यसीकृततत्वादादेशानंतरमपितृत्वःप्रवृत्तिरस्तीतिभुवो
वुकोनित्यत्वादित्यादिग्रंथःसम्यगेव।नचैवमपिनामधातुसुत्वापयतिमापयतीत्यत्रमपर्यंतस्यतमोपरस्रूपात्सर्वनित्यत्वाहिलोपइति
ग्रंथःकथंसंगच्छेतेतिवाच्यं।पक्षसेकाचितिसूत्रंभाष्यप्रत्याख्यानमित्याशयेनतत्प्रवृत्तेः।अतएवत्वादयतिमादयतीत्येवमे
यमितितत्रोक्तमितिदिक्।आर्द्धधातुकस्येडूलादेः।नेड्वशिकृतीत्यतःइडित्यनुवर्त्तमानेपुनरिड्ग्रहणंनिषेधसंबद्धस्येटे निवृत्त
र्थं।वस्तुतस्तुसमर्थानांप्रथमाद्वेत्यतुवृत्तस्यपदत्रयस्यमध्येप्रागदिशइत्यनंतरंसमर्थानांप्रथमेतितिवृत्तंवेतितत्रनुवर्त्ततइति
व्याख्यानमिवनेति।निवृत्तंइडित्यनुवर्त्ततइतिव्याख्यातुंशक्यत्वादिड्ग्रहणंत्यक्तुंशक्यंतथा।पित्स्वद्वपतिपर्यंतत्वीहृतमि
तिवोध्यं।आर्द्धधेतिकिं।आस्तेशेतेतोवलादेःकिं।एधनीया।ननुरुदादिभ्यःसार्वधातुकइत्यनेनसार्वधातुकस्यपदिइड्वतितर्हिर
दादिभ्यएवेतिनियमादास्तेशेतेइत्यत्रनभवेदितिसार्द्धधातुकस्येतिव्यर्थं।नचरुदादिभ्यःसार्वधातुकएवेतिविपरीतनियमाङ्गे
दितेसत्रनस्यादास्तेशेतेत्यत्रतुस्यादितिशंक्यं।रुदविदमुषग्रहिस्वपिप्रच्छःसंश्चेति।क्त्वासनोःकित्वस्यैवैपर्थ्यप्रसंगात्।तदुक्त
रीत्यारुदादेःक्त्वासनोरिडागमाभावेनतत्क्त्वासेडितिनिषेधाप्रवृत्त्याक्त्वाप्रत्ययेऔपदेशिककित्वस्यसुस्थत्वात्।हलंतावेतिमूला राम
दिसनःकित्वाच्चात्तस्माद्विपरीतनियमासंभवेनआर्द्धधातुकग्रहणंव्यर्थमेव।ननुतद्ग्रहणाभावेवलादेरित्यस्यांगस्येतियदविहृतंत ११

हिशेष्यंस्यात्तनतच्चउडागादिवदिडागमोपिचांगस्यस्यात्।मैवं।कृतेप्यार्द्धधातुग्रहणेवलाद्यार्द्धधातुकस्यपदंगंतस्येडागमइतिव्याख्या
नापत्यागत्तदोषतादवस्थ्यात्।अकृतेपितद्ग्रहणेअंगस्यैवोवलादिरंगनिमित्तंतस्येडितिव्याख्यानादिष्टसिद्धेश्च।तस्मादुभयथापि
व्याख्यानेशरणीकर्त्तव्येआर्द्धधातुकस्येत्यस्यत्यागएवश्रेयान्।नन्वेवंकेवशाःअंगानाहृत्त्वमित्यवेद्स्यात्।कृतरुद्दातोरित्यतःधा
रित्यनुवर्त्तनादधातोःपरस्यनभवतीतिपरिहारसंभवेपित्लृभ्यांहृभ्यामित्यत्रदुर्वारएवेडागमःविहितविशेषणोनाथपंचारितुमथ
त्यःधिवंताःधातुत्वंनजहतीतिल्त्र्यांल्रामिरित्यत्रभ्यामादेर्धातोर्विहितत्वानपायात्।किंचजुगुप्सतेइत्यादौगुप्तिजाकिद्भ्यइतिधातो
र्विहितस्यसनःइट्दुर्वारःस्यात्तनचेहधातोःपरत्वविहितस्यवलादेरितिव्याख्यानत्नाभाद्धातोरितिपंचम्यंतमपेहितंतत्रदुर्ल
भं।नतरूद्वातोरित्यत्रधातोरितिषष्ठ्यंतत्वात्तथाचहृद्त्वमित्यादावपिइडागमप्रसंगइतिवाच्यं।प्रकृतिविकारपक्षेस्वरितेन
